सप्तशती के मंत्रों के पाठमात्र से ही सप्त जन्मों के उपार्जित ब्रह्महत्या के समान घोर पाप से छुटकारा मिल जाता है ॥ २४ ॥

अत्यन्त गुप्त से भी गुप्त देवी के ध्यान का मैंने वर्णन किया। अतः पूर्ण प्रयत्न करके देवी का ध्यान करने से सभी कामनाओं की पूर्ति हो जाती है ॥ २५ ॥

इनकी कृपा से तुम सर्वमान्य हो जाओगे। देवी सर्वरूपमयी हैं, सारा संसार देवीमय है। अतः मैं विश्वरूपा परमेश्वरी को नमस्कार करता हूँ ॥२६॥

मूर्तिरहस्य समाप्त

—०:०—

क्षमा-याचना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ ३ ॥

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥

सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥

हे परमेश्वरि ? रात-दिन मेरे द्वारा हजारों अपराध होते रहते हैं । "मेरा यह दास है" ऐसा समझकर उसे क्षमा करें ॥ १ ॥

मैं आवाहन करना नहीं जानता हूँ, न तो विसर्जन करना ही और न पूजा करना ही जानता हूँ, अतः हे परमेश्वरि ! आप क्षमा करें ॥ २ ॥

हे सुरेश्वरि ! मैंने भक्तिहीन, क्रियाहीन तथा मंत्रहींन जो आपकी पूजा की है, हे देवि ! वह आपकी कृपा से सफल हो ॥ ३ ॥

सैंकड़ों अपराध करके भी 'जगदम्बा' यह उच्चारण करके जिस गति को लोग प्राप्त करते हैं, उसे ब्रह्मा आदि देवगण भी नहीं प्राप्त कर सकते हैं ॥४॥

जगदम्बिके ! मैं अपराधी हूँ, फिर भी आपकी शरण में आया हूँ, इस समय मैं दया का पात्र हूँ जैसा आप चाहें, वैसा करें । अज्ञानवश या मति-

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६ ॥

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७ ॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ८ ॥

॥ श्रीदुर्गार्पणमस्तु ॥

—:०:—

भ्रम से कम या अधिक जो भी गलतियाँ मैंने की हैं, उसे क्षमा करें । हे देवि ! परमेश्वरि ! आप प्रसन्न होवें ॥ ५–६ ॥

हे कामेश्वरि ! जगन्मातः ! सच्चिदानन्दविग्रहे ! परमेश्वरि ! मेरी इस पूजा को आप प्रेमपूर्वक ग्रहण करें तथा मुझ पर प्रसन्न होवें ॥ ७ ॥

हे देवि आप गुप्त से भी गुप्त चीजों की रक्षा करनेवाली हैं, मेरे किये हुए जप को आप ग्रहण करें और आपकी कृपा से मुझे सिद्धि प्राप्त हो ॥ ८ ॥

—:०:—

श्रीदुर्गामानस-पूजा

उद्यच्चन्दनकुङ्कुमारुणपयोधाराभिराप्लावितां
    नानानर्घ्यमणिप्रवालघटितां दत्तां गृहाणाम्बिके ।
आमृष्टां सुरसुन्दरीभिरभितो हस्ताम्बुजैर्भक्तितो
    मातः सुन्दरि भक्तकल्पलतिके श्रीपादुकामादरात् ॥१॥
देवेन्द्रादिभिरर्चितं सुरगणैरादाय सिंहासनं
    चञ्चत्काञ्चनसंचयाभिरचितं चारुप्रभाभास्वरम् ।
एतच्चम्पककेतकीपरिमलं तैलं महानिर्मलं
    गन्धोद्वर्तनमादरेण तरुणीदत्तं गृहाणाम्बिके ॥२॥
पश्चाद्देवि गृहाण शम्भुगृहिणि श्रीसुन्दरि प्रायशो
    गन्धद्रव्यसमूहनिर्भरतरं धात्रीफलं निर्मलम् ।

उत्तम चन्दन और कुङ्कुम से मिश्रित लाल जल से स्वच्छ किया हुआ, अनेकों प्रकार के बहुमूल्य मणियों और मूंगों से निर्मित, बहुत-सी सुरसुन्दरियों के करकमलों द्वारा भक्तिपूर्वक चारों तरफ सजाया गया यह पादुका आपके चरण कमलों में समर्पित हैं, हे मातः त्रिपुरसुन्दरी ! भक्तों की अभिलाषाओं की पूर्ति करनेवाली कल्पलता स्वरूपे ! आप इसे ग्रहण करें ॥ १ ॥

हे अम्बिके ! युवतियों द्वारा आदरपूर्वक यह सिंहासन आपकी सेवा में अर्पण की जा रही है, इसे आप स्वीकार करें। यह देवेन्द्र आदि के द्वारा पूजित है तथा देवताओं ने इसे लाया है। यह देदीप्यमान सोने के ढेरों से निर्मित तथा सुन्दर प्रभाओं से चमक रहा है। केतकी और चम्पा के सुगन्ध से युक्त अत्यन्त निर्मल तेल और उबटन भी इसमें लगा हुआ है ॥ २ ॥

हे देवि ! शम्भुप्रिये ! श्री सुन्दरि ! इसके बाद आप निर्मल धात्रीफल को ग्रहण करें। इस धात्रीफल में अनेकों सुगन्धित द्रव्य मिश्रित है, इसे अपने

तत्केशान् परिशोध्य कङ्कतिकया मन्दाकिनीस्रोतसि
स्नात्वा प्रोज्ज्वलगन्धकं भवतु हे श्रीसुन्दरि त्वन्मुदे ।।३।।
सुराधिपतिकामिनीकरसरोजनालीधृतां
सचन्दनसकुङ्कुमागुरुभरेण विभ्राजिताम् ।
महापरिमलोज्ज्वलां सरसशुद्धकस्तूरिकां
गृहाण वरदायिनी त्रिपुरसुन्दरि श्रीप्रदे ।। ४ ।।
गन्धर्वामरकिन्नरप्रियतमासन्तानहस्ताम्बुज-
प्रस्तारैर्ध्रियमाणमुत्तमतरं काश्मीरजापिञ्जरम् ।
मातर्भास्वरभानुमण्डललसत्कान्तिप्रदानोज्ज्वलं
चैतन्निर्मलमातनोतु वसनं श्रीसुन्दरि त्वन्मुदम् ।। ५ ।।

बालों में लगाकर कंघी से साफ करके गङ्गा की निर्मल धारा में स्नान करके हे श्री सुन्दरि ! इस दिव्य वस्तु को लगालें; यह आपके आनन्द के लिये है ।।३।।

सभी वरदानों की पूर्ति करनेवाली तथा सम्पत्ति को देनेवाली हे त्रिपुर-सुन्दरि ! देवराज इन्द्र की पत्नी अपने करकमलों में कस्तूरी लेकर खड़ी है, इसे तुम ग्रहण करो। यह अत्यन्त शुद्ध एवं सरस है। इसमें चन्दन, कुङ्कुम तथा अगुरु के मिश्रित हो जाने से इसकी सुन्दरता बढ़ गई है और चमक रही है ।। ४ ।।

हे श्री सुन्दरि ! तुम्हारे आनन्द को बढ़ाने के लिये यह वस्त्र है, इसे तुम ग्रहण करो। यह निर्मल पीताम्बर केसर में रंगा है। इसे गन्धर्व देवता और किन्नर की अतिसुन्दरी स्त्रियाँ अपने करकमलों में लेकर खड़ी हैं। इससे सूर्य-मण्डल की उज्वलकान्ति निकल रही है, जिससे यह अत्यन्त शोभायमान हो रहा है ।। ५ ।।

स्वर्णाकल्पितकुण्डले श्रुतियुगे हस्ताम्बुजे मुद्रिका
मध्ये सारसना नितम्बसफले मञ्जीरमङ्घ्रिद्वये ।
हारो वक्षसि कङ्कणौ क्वणरणत्कारौ करद्वन्द्वके
विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयताम् ॥ ६ ॥
ग्रीवायां धृतकान्तिकान्तपटलं ग्रैवेयकं सुन्दरं
सिन्दूरं विलसल्ललाटफलके सौन्दर्यमुद्राधरम् ।
राजत्कज्जलमुज्ज्वलोत्पलदलश्रीमोचने लोचने
तद्दिव्यौषधिनिर्मितं रचयतु श्रीशाम्भवि श्रीप्रदे ॥ ७ ॥
अमन्दतरमन्दरोन्मथितदुग्धसिन्धूद्भवं
निशाकरकरोपमं त्रिपुरसुन्दरि श्रीप्रदे ।
गृहाण मुखमीक्षितुं मुकुरबिम्बमाविद्रुमै-
र्विनिर्मितमघच्छिदे रतिकराम्बुजस्थायिनम् ॥ ८ ॥

हे देवि ! तुम्हारे कानों में स्वर्ण निर्मित कुण्डल, कमर में नितम्बों पर करधनी, करकमलों में अंगूठी तथा दोनों चरणों में मंजीर सुशोभित होवें। वक्षस्थल (गर्दन) में माला शोभा को बढ़ावें। दोनों कलाइयों में कंगन की आवाजें होती रहें। मस्तक पर दिव्य मुकुट तुम्हारी प्रसन्नता को बढ़ावें। ये सभी आभूषण तुम्हारे आनन्द बढ़ाते रहें ॥ ६ ॥

सम्पत्ति को देनेवाली हे शिववल्लभे ! कान्ति-युक्त सुन्दर हँसुली तुम अपने गले में धारण करो और मस्तक पर सिन्दूर की बिन्दी लगा लो। अनेकों दिव्य औषधियों से निर्मित, कमलपत्र की भी शोभा को दबा देनेवाले इस काजल को अपने नेत्रों में लगाकर शोभा बढ़ाओ ॥ ७ ॥

हे त्रिपुरसुन्दरि ! तुम पापों को दूर करनेवाली हो तथा सम्पत्ति को देनेवाली हो। हे देवि ! चन्द्रमा की किरणों के समान चमकने वाले इस सुन्दर दर्पण को तुम ग्रहण करो। यह मंदराचल पर्वत की मथनी से क्षीरसागर को मथकर निकाला गया है। इसके चारों ओर मूंगे लगे हैं। कामदेव की स्त्री रति इसे करकमलों में लेकर खड़ी है। इसे तुम ग्रहण करो ॥ ८ ॥

कस्तूरीद्रवचन्दनागुरुसुधाधाराभिराप्लावितं
चञ्चच्चम्पकपाटलादिसुरभिद्रव्यैः सुगन्धीकृतम् ।
देवस्त्रीगणमस्तकस्थितमहारत्नादिकुम्भव्रजै-
रम्भः शाम्भवि संभ्रमेण विमलं दत्तं गृहाणाम्बिके ॥ ९ ॥
कह्लारोत्पलनागकेसरसरोजाख्यावलीमालती-
मल्लीकैरवकेतकादिकुसुमै रक्ताश्वमारादिभिः ।
पुष्पैर्माल्यभरेण वै सुरभिणा नानारसस्रोतसा
ताम्राम्भोजनिवासिनीं भगवतीं श्रीचण्डिकां पूजये ॥१०॥
मांसीगुग्गुलचन्दनागुरुरजःकर्पूरशैलेयजै-
र्माध्वीकैः सह कुङ्कुमैः सुरचितैः सर्पिर्भिरामिश्रितैः ।
सौरभ्यस्थितिमन्दिरे मणिमये पात्रे भवेत् प्रीतये
धूपोऽयं सुरकामिनीविरचितः श्रीचण्डिके त्वन्मुदे ॥११॥

हे शिवप्रिये ! अम्बिके ! इस निर्मल जल को ग्रहण करो। इसमें चम्पा तथा गुलाल आदि अनेकों सुगन्धित द्रव्य मिले हुए हैं। कस्तूरी रस, चन्दन, अगुरु और अमृत की धारा से भी यह जल युक्त हैं। विविध रत्नों से युक्त कलशों में भरकर सुरसुन्दरियाँ अपने मस्तक पर लेकर गिराने के लिए खड़ी हैं। क्षतः इसे तुम स्वीकार करो ॥ ९ ॥

कल्हार, उत्पल, नागकेसर, कमल, मालती, मल्लिका, कुमुद, केतकी तथा लालकनेर आदि अनेकों पुष्पों एवं पुष्पमालाओं से विभूषित, विविध प्रकार के रसों की धारा से लाल कमल के अन्दर निवास करनेवाली श्री अम्बिका देवी की मैं पूजा करता हूँ ॥ १० ॥

हे चण्डिके ! देवाङ्गनाओं द्वारा विरचित यह धूप तुम्हारी प्रसन्नता के लिए हो। यह मधु, कुंकुम तथा घृत से मिश्रित जटामासी, गुग्गुल, चन्दन, अगुरु चूर्ण, कर्पूर, शिलाजीत से सुगन्धित के एकमात्र स्थान मणिमयपात्र में है जो तुम्हारे हर्ष बढ़ाने के लिये है ॥ ११ ॥

घृतद्रवपरिस्फुरद्रुचिररत्नयष्ट्यान्वितो

महातिमिरनाशनः सुरनितम्बिनीनिर्मितः ।

सुवर्णचषकस्थितः सघनसारवर्त्यान्वित-

स्तव त्रिपुरसुन्दरि स्फुरति देवि दीपो मुदे ॥१२॥

जातीसौरभनिर्भरं रुचिकरं शाल्योदनं निर्मलं

युक्तं हिङ्गुमरीचजीरसुरभिद्रव्यान्वितैर्व्यञ्जनैः ।

पक्वान्नेन सपायसेन मधुना दध्याज्यसंमिश्रितं

नैवेद्यं सुरकामिनीविरचितं श्रीचण्डिके त्वन्मुदे ॥१३॥

लवङ्गकलिकोज्ज्वलं बहुलनागवल्लीदलं

सजातिफलकोमलं सघनसारपूगीफलम् ।

हे त्रिपुरसुन्दरि देवि ! देवाङ्गनाओं के द्वारा निर्मित सुवर्णपात्र में स्थित बत्ती से युक्त होकर जलता हुआ यह दीप तुम्हारे आनन्द के लिये हो । यह द्रवीभूत घी से जलता हुआ सुन्दर रत्न के डण्डे से युक्त और महान् अन्धकार का नाशक हैं ॥ १२ ॥

हे चण्डिके ! अत्यन्त रुचिकर और चमेली के फूल के समान सुगन्धित अगहनी चावल से सुरसुन्दरियों द्वारा बनाया गया भात, हींग, मिर्च, जीरा आदि सुगन्धित द्रव्यों से तैयार किया गया नाना प्रकार का व्यञ्जन एवं पकवान, खीर, मधु, दही तथा घी से मिश्रित यह नैवेद्य तुम्हारी प्रसन्नता के लिए हो ॥ १३ ॥

मा ! यह रत्नमय पात्र में रक्खा हुआ ताम्बूल है, इसे अपने मुख में ग्रहण करो । इसमें कोमल जावित्री, कर्पूर (पिटरमिण्ट) तथा सुपारी डाला गया है । इसके बीरे लौंग चुभोकर तैयार किये गये हैं । यह मधुमय सुधा

सुधामधुरिमाकुलं रुचिररत्नपात्रस्थितं
गृहाण मुखपङ्कजे स्फुरितमम्ब ताम्बूलकम् ।।१४।।

शरत्प्रभवचन्द्रमःस्फुरितचन्द्रिकासुन्दरं
गलत्सुरतरङ्गिणीललितमौक्तिकाडम्बरम् ।
गृहाण नवकाञ्चनप्रभवदण्डखण्डोज्ज्वलं
महात्रिपुरसुन्दरि प्रकटमातपत्रं महत् ।।१५।।

मातस्त्वन्मुदमातनोतु सुभगस्त्रीभिः सदान्दोलितं
शुभ्रं चामरमिन्दुकुन्दसदृशं प्रस्वेददुःखापहम् ।
सद्योऽगस्त्यवसिष्ठनारदशुकव्यासादिवाल्मीकिभिः
स्वे चित्ते क्रियमाण एव कुरुतां शर्माणि वेदध्वनिः ।।१६।।

(चूर्ण) से युक्त, अनेक पान के पत्तों से निर्मित है। अतः यह अत्यन्त ही सुन्दर है ।। १४ ।।

मा ! महात्रिपुरसुन्दरि ! तुम्हारे लिए यह सुवर्णमय दण्डा से युक्त होने के कारण अत्यन्त सुन्दर विशाल छत्र प्रस्तुत है, इसे तुम ग्रहण करो। यह शरत्कालीन चन्द्रमा की चाँदनी की तरह सुन्दर है। इसमें ऊपर से नीचे की ओर गिरती हुई गंगा की धारा की तरह मोतियों की झालरें लगी हुई हैं।।१५।।

हे देवि ! सुन्दर स्त्रियों के द्वारा सदा डुलाए जाने वाले चँवर तुम्हारे आनन्द को बढ़ावें। यह कुन्द तथा चन्द्रमा के समान शुभ्र तथा पसीने के कष्ट से मुक्त करनेवाला है। इसके अतिरिक्त महर्षि अगस्त्य, वशिष्ठ, नारद, शुक्र, व्यास और वाल्मीकि मुनि अपने-अपने मन में जो वेदध्वनि करते हैं, वह भी तुम्हारे हर्ष को बढ़ावें ।। १६ ।।

स्वर्गाङ्गणे वेणुमृदङ्गशङ्ख-
भेरीनिनादैरुपगीयमाना ।
कोलाहलैराकलिता तवास्तु
विद्याधरी नृत्यकला सुखाय ।। १७ ।।
देवि भक्तिरसभावितवृत्ते
प्रीयतां यदि कुतोऽपि लभ्यते ।
तत्र लौल्यमपि सत्फलमेकं
जन्मकोटिभिरपीह न लभ्यम् ।। १८ ।।
एतैः षोडशभिः पद्यैरुपचारोपकल्पितैः ।
यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ।। १९ ।।

इति दुर्गामानसपूजा समाप्ता

स्वर्ग के प्राङ्गण में वेणु, मृदङ्ग, शङ्ख और भेरी के शब्दों से गाये जाने पर कोलाहल से युक्त विद्याधरी की नृत्यकला तुम्हारे सुख के लिये हो ।। १७ ।।

हे देवि ! मेरे इस स्तोत्र में कुछ भी यदि भक्तिभाव हो तो प्रसन्न हो जाओ । तुम्हारी भक्ति भावना के लिए ही मेरा मन व्याकुल है । वह तुम्हारी कृपा के बिना करोड़ों बार जन्म लेने पर भी सुलभ नहीं हो सकता है ।। १८ ।।

इन सोलह पद्यों के द्वारा तथा विविध प्रकार के उपचारों से जो महामाया परमेश्वरी की स्तुति करता है उसे सभी प्रकार के फल मिल जाते हैं ।। १९ ।।

दुर्गामानसपूजा समाप्त

अथ दुर्गाद्वात्रिंशन्नाममाला

दुर्गा दुर्गार्तिशमनी दुर्गापद्विनिवारिणी ।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥
दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा ।
दुर्गमज्ञानदा दुर्गदैत्यलोकदवानला ॥
दुर्गमा दुर्गमालोका दुर्गमात्मस्वरूपिणी ।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता ॥
दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी ।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी ॥
दुर्गमासुरसंहन्त्री दुर्गमायुधधारिणी ।
दुर्गमाङ्गी दुर्गमता दुर्गम्या दुर्गमेश्वरी ॥
दुर्गभीमा दुर्गभामा दुर्गभा दुर्गदारिणी ।
नामावलिमिमां यस्तु दुर्गाया मम मानवः ॥
पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः ।

इति दुर्गाद्वात्रिंशन्नाममाला समाप्ता

—:०:—

अथ देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायते क्वचिदपि कुमाता न भवति ॥ २ ॥
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।

हे माँ ! मैं न मन्त्र जानता हूँ, न यन्त्र जानता हूँ और न तो स्तुति ही जानता हूँ । मैं तेरा आवाहन, ध्यान, पूजन और मुद्रा भी नहीं जानता हूँ । एवं रोना भी नहीं जानता हूँ । किन्तु इतना तो अवश्य जानता हूँ कि तेरा अनुसरण करने से सभी क्लेशों का विनाश हो जाता है ॥ १ ॥

तेरे पूजन में अनभिज्ञ, धन के अभाव तथा आलस्य के कारण विधिवत पूजा करने में असमर्थ होने से जो तुम्हारे चरणों से मैं दूर रहा हूँ, हे माँ ! यह जो मेरा अपराध है, वह क्षमा करने योग्य है । तुम सबों का उद्धार करनेवाली हो । हे शिवे ! पुत्र कुपुत्र हो सकता है किन्तु माता कभी भी कुमाता नहीं होती हैं ॥ २ ॥

हे जननि ! पृथ्वी पर बहुत से तुम्हारे सरल पुत्र हैं, उन सबों में मैं हीं एक चंचल तुम्हारा पुत्र हूँ, जिसको तुमने त्याग दिया है । हे शिवे ! यह

मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥
जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥
परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।

त्याग ना तुम्हारे लिए उचित नहीं है, क्योंकि पुत्र कुपुत्र हो सकता है किन्तु माता कभी भी कुमाता नहीं हो सकती हैं ॥ ३ ॥

हे जगज्जननि ! हे माँ ! मैंने तुम्हारे चरणों की कभी भी सेवा नहीं की, न तो धन ही अर्पण किया । हे देवि ! फिर भी तुमने इतना अधिक जो मेरे ऊपर कृपा की है, वह ठीक ही है, क्योंकि पुत्र कुपुत्र हो सकता है, किन्तु माता कभी भी कुमाता नहीं हो सकती है ॥ ४ ॥

अनेकों प्रकार की सेवा से व्याकुल होकर मैंने सभी देवों को परित्याग कर दिया हूँ । इस समय मेरी अवस्था पचासी वर्ष से भी अधिक होने जा रही है । हे माँ ! इस समय यदि तेरी कृपा हमारे ऊपर नहीं होगी, तो हे गणेश-जननि ! आश्रयहीन होकर मैं किस की शरण में जाऊँगा ॥ ५ ॥

हे अपर्णे ! तुम्हारे मंत्र का एक अक्षर भी कान में पड़ जाने का परिणाम यह होता है कि बकवादी लोग मधुर भाषण करनेवाले प्रवक्ता की तरह हो जाते हैं; धनहीन व्यक्ति करोड़ों सुवर्ण मुद्राओं से युक्त होकर भयरहित विचरण

तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जननीयं जपविधौ ॥ ६ ॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥
न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिवशिवभवानीति जपतः ॥ ८ ॥
नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।

करने लगते हैं। हे जननि ! जपविधि के साथ जप करने से क्या फल होगा ? यह कौन जान सकता है। अर्थात् यह जानना असम्भव है ॥ ६ ॥

हे शिवप्रिये ! चिता की भस्मों का लेप करनेवाला, विष का पान करनेवाला, दिगम्बर, जटाधारी, कंठ में सर्पो की माला धारण करनेवाला, पशुओं का पति, कपाली (भिक्षाटन के लिए हाथ में खप्पर धारण करनेवाला) शंकरजी संसार के ईश्वर का जो पद धारण करता है, हे देवि ! यह तुम्हारे साथ प्राणि ग्रहण की प्रथा का ही परिणाम है ॥ ७ ॥

हे चन्द्रमुखि ! मुझको न मोक्ष की इच्छा है, न तो सांसारिक ऐश्वर्य की इच्छा है, न तो विज्ञान की अपेक्षा है और न पुनः सुख की ही इच्छा है। अतः हे जननि ! मैं केवल यही वरदान माँगता हूँ कि मृडानीं, रुद्राणीं, शिव-शिव भवानी इतना जप करते-करते मेरा जीवन बीत जाय ॥ ८ ॥

हे श्यामे ! मेरे द्वारा न विधानपूर्वक अनेकों उपचारों से, न अत्यधिक चिन्तन से और न तो वाणी द्वारा ही तुम्हारी पूजा की गई, फिर भी हे

श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परा न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥

इति श्रीशङ्कराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।

—:०:—

जननि ! मुझ अनाथ पर यदि तेरी कृपा है तो यह तेरे लिए उचित ही है ॥९॥

हे दुर्गे ! हे दया के सागरि ! देवि विपत्तियों में मग्न मैं तेरा स्मरण करता हूँ । इस मेरी शठता पर ध्यान मत देना, क्योंकि भूख और प्यास से व्याकुल बच्चे ही मा का स्मरण करते हैं ॥ १० ॥

हे जगदम्ब ! यदि मेरे ऊपर तेरी पूर्ण कृपा है तो इसमें आश्चर्य ही क्या है ? क्योंकि बारम्बार अपराध करने पर भी माता अपने पुत्र की उपेक्षा नहीं करती ॥ ११ ॥

हे महादेवि ! जिस प्रकार मेरे समान कोई दूसरा पापी नहीं है, उसी प्रकार तेरे समान दूसरी पापों का नाश करनेवाली भी नहीं है । ऐसा समझकर जैसा उचित समझो वैसा करो ॥ १२ ॥

देव्यापराधक्षमापनस्तोत्र समाप्त

—:०:—

अथ सिद्धकुञ्जिकास्तोत्रम्

शिव उवाच

शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेद् ॥ १ ॥

न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् ।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥ २ ॥

कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥ ३ ॥

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ।
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ॥ ४ ॥

अथ मन्त्रः

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ॥ इति मन्त्रः ॥ नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ॥ नमः कैटभहारिण्यै नमस्ते महिषार्दिनि ॥ १ ॥ नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ॥ २ ॥ जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ॥ ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका ॥ ३ ॥ क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते ॥ चामुण्डा चण्डघाती च यैकारी वरदायिनी ॥ ४ ॥ विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ॥ ५ ॥ धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी । क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ॥ ६ ॥ हुं हुं हुंकार-

रूपिण्यै जं जं जं जम्भनादिनि ।। भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ।। ७ ।। अं कं चं टं तं पं यं सं वीं दुं ऐं वीं हं क्षं धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ।। पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ।। ८ ।। सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे ।। इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।। अभक्तेनैव दातव्यं गोपितं रक्ष पार्वति ।। यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् । न तस्य जायते सिद्धिररण्ये रोदनं यथा ।।

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे
सिद्धकुञ्जिकास्तोत्रं सम्पूर्णम् ।

अथ श्रीदुर्गापदुद्धारस्तोत्रम्

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे। नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणी त्राहि दुर्गे ॥ १ ॥

नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनी ज्ञानरूपे। नमस्ते नमस्ते सदानन्दरूपे नमस्ते० ॥ २ ॥

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः। त्वमेका गतिर्देवि निस्तारकर्त्री नमस्ते० ॥ ३ ॥

अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे। त्वमेका गतिर्देवि निस्तारनौका नमस्ते० ॥ ४ ॥

हे देवि ! तुम शिवस्वरूपा हो, दयामयी हो। शरण में जाने योग्य तुम्हें नमस्कार है। सम्पूर्ण संसार में व्याप्त विश्वरूपवाली दुर्गे ! तुम्हें नमस्कार है। सम्पूर्ण विश्व के द्वारा पूजित चरणकमल वाली देवी ! तुम्हें नमस्कार है। संसार का उद्धार करनेवाली ! तुम्हें नमस्कार है। हे दुर्गे ! तुम मेरी रक्षा करो। सम्पूर्ण संसार के द्वारा ध्यान के योग्य स्वरूपवाली तुम्हें नमस्कार है। ज्ञानस्वरूपा महायोगिनी देवि ! तुम्हें नमस्कार है। सत् और आनन्दरूपवाली दुर्गे ! तुम्हे अनेकों वार नमस्कार है ॥ २ ॥

अनाथ, दीन, तृष्णा से व्याकुल, भयभीत तथा भय से बँधे हुए प्राणियों के तुम्ही एक मात्र गति हो। संसार सागर से पार करनेवाली हे देवि ! तुम्हें नमस्कार है ॥ ३ ॥

जंगल, भयंकर युद्धस्थल, शत्रुओं के मध्य, अग्नि, सागर, पर्वत तथा राजभवन में पार करतेवाली नौकास्वरूपिणी हो। तुम्हीं एकमात्र शरण हो। हे देवि ! तुम्हें अनेकों वार नमस्कार है ॥ ४ ॥

अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देह-भाजाम् । त्वमेका गतिर्देवि निस्तारहेतुर्नमस्ते० ॥ ५ ॥

नमश्चण्डिके चण्डदुर्दण्डलीला समुत्खण्डिताखण्डिताशेष-शत्रो । त्वमेका गतिर्देवि निस्तारबीजं नमस्ते० ॥ ६ ॥

त्वमेवाघभावाधृतासत्यवादिनि जाताजिता क्रोधनात् क्रोध-निष्ठा । इडापिङ्गला त्वं सुषुम्णा च नाडी नमस्ते० ॥ ७ ॥

नमो देवि दुर्गे शिवे भीमनादे सरस्वत्यरुन्धत्यमोघस्वरूपे । विभूतिः शची कालरात्रिः सती त्वं नमस्ते० ॥ ८ ॥

शरणमसि सुराणां सिद्धविद्याधराणां मुनिमनुजपशूनां

अगम तथा अति दुस्तर, अत्यन्त भयानक, आपत्तिरूपी समुद्र में डुबा हुआ शरीरधारी जीवों का तुम निस्तार करनेवाली हो । तुम्हीं एकमात्र शरण हो । हे देवि तुम्हें अनेकों बार नमस्कार है ॥ ५ ॥

हे चण्डिके ! तुम्हें नमस्कार है । अति भयानक एवं दुर्दण्डलीला के द्वारा सभी प्रबल शत्रुओं का विनाश करनेवाली एवं सबों के निस्तार के कारणरूप हे देवि ! तुम्हीं एकमात्र शरण हो । तुम्हें अनेकों बार नमस्कार है ॥ ६ ॥

हे देवि ? तुम्हीं पापरूप से असत्यवादियों के हृदय में स्थित रहती हो । क्रोध के कारण क्रोध रूप में विद्यमान रहकर भी अजिता (नहीं जानने योग्य) हो । इडा, पिङ्गला तथा सुपुम्ना नाडी के रूप में तुम्हीं स्थित हो । हे देवि ! तुम्हें अनेकों बार नमस्कार है ॥ ७ ॥

दुर्गा, शिवा, भयंकर शब्द करनेवाली सरस्वती, अरुन्धती तथा अमोघ स्वरूपवाली हे देवि ! तुम्हें नमस्कार है । विभूति, शची, कालरात्रि तथा सतीस्वरूपिणी देवि ! तुम्हें अनेकों बार नमस्कार है ॥ ८ ॥

देवों, सिद्धविद्याधरों, मुनियों, मनुष्यों, पशुओं तथा डाकुओं से भयभीत लोगों की तुम्हीं एकमात्र शरण हो । अपराधियों के रूप में राजाओं के घर

दस्युभिस्त्रासितानाम् । नृपतिगृहगतानां व्याधिभिः पीडितानां
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ९ ॥

इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।
त्रिसन्ध्यमेकसन्ध्यं वा पठनाद् घोरसंकटात् ॥ १० ॥
मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ।
सर्वं वा श्लोकमेकं वा यः पठेद् भक्तिमान् सदा ॥ ११ ॥
स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ।
पठनादस्य देवेशि किं न सिध्यति भूतले ॥ १२ ॥
स्तवराजमिमं देवि संक्षेपात्कथितं मया ॥ १३ ॥

इति दुर्गापदुद्धारस्तोत्रम्

—:०:—

गये हुए और रोग से पीड़ित मनुष्यों का एकमात्र शरण तुम्हीं हो। हे दुर्गे देवि ! प्रसन्न होओ ॥ ९ ॥

आपत्ति से उद्धार करनेवाले स्तोत्र को मैंने कहा। तीनों समय अथवा एक समय पृथिवी, स्वर्ग या पाताल में पाठ करने से भयानक संकटरूपी बन्धन से मनुष्य विमुक्त हो जाता है। इसमें तनिक भी सन्देह नहीं है। सभी श्लोकों या एक श्लोक को जो भक्त सदा पाठ करता है वह सभी प्रकार के दुष्कर्मों को परित्याग कर परमपद प्राप्त करता है। हे देवेशि ! इस स्तोत्र का पाठ करने से पृथ्वी पर किस चीज की सिद्धि नहीं होती है अर्थात् सभी कामनाएँ सिद्ध हो जाती हैं ॥ १०–१२ ॥

हे देवि ! इस स्तवराज को मैंने संक्षेप से कहा है ॥ १३ ॥

—:०:—

अथ दुर्गादलम्

अथ चण्डिकादलप्रारम्भः । ॐ नमश्चण्डिकायै । अथातः संप्रवक्ष्यामि चण्डिकादलमुत्तमम् । मन्त्रं विना तु जप्त्वा वै तत्सर्वं निष्फलं भवेत् ।। १ ।। ॐ नमो भगवती जय जय चामुण्डे चण्डेश्वरी चण्डायुधे चण्डरूपधारिणी ताण्डवप्रिये कुण्डलीभूत-दिङ्नागमंडलीभूत-गंडस्थिते समस्तजगदण्डसंहार-कारिणी परे अनन्तानन्तरूपे शिवे नरमालालंकृतवक्षः-स्थले महाकपालभालोज्ज्वलन्मणिमुकुटचूडावतंसचन्द्रखण्डे महा-भीषणे देवी महामाये षोडशकलापरिवृतोल्लसिते महादेवासुर-समरनिघृतरुधिराद्रिक्रुंतलिम्पिततनुकमलोद्भासिते करे सम्पूर्ण-रुधिरशोभितमहाकपाले सूर्यभासिनी दृढतराबद्धमनु ।। ११४ ।।

धरशोभितमहाकपोले चन्द्रभासिनि दृढतराबद्धमहानादि-सहितहेमशाश्विदाशोज्वलीकृतमहामण्डिते महाशम्भुरूपे महा-व्याघ्रचर्माम्बरधरे महासर्पयज्ञोपवीतिनी महाश्मशानभस्मोद्धू-लितसर्वगात्रे काली कंकाली महाकाली कालाग्निरुद्रकाली कालसंकर्षिणी ।। २०० ।।

कालरात्रि नमो भक्षिणी नानाभूतप्रेतपिशाचगणसहस्र-सञ्चारिणी नानाव्याधिप्रशमनी सर्वदुष्टप्रथमिनी सर्वदारिद्र्य-नाशिनी युगे युगे स्वादितमांसखण्डे गायत्री विक्षिप्तकला कलायमानकंकालधारिणी मधुरमांसरुधिरसन्ततविलासिनी सकलसुरासुरगन्धर्वविद्याधरकिन्नरकिम्पुरुषादिभिः स्तूयमाने सर्वमन्त्राधिभूताधिकारिणी सर्वशक्तिप्रधाने सकललोकपावनी सकलदुरितप्रक्षालिनी सकललोकजननी ब्राह्मी माहेश्वरी

कौमारी वैष्णवी वाराही नारसिंहीन्द्राणी चामुण्डे । महालक्ष्मी-स्वरूपे महाविद्ये योगिनी ॥ ५०० ॥

योगीश्वरी चण्डिके महामाये विश्वरूपिणी सर्वाभरणभूषिते अतल-वितल-सुतल-महातल-रसातल-पातालादि चतुर्दशभुवनैक-नाथे, ॐ नमः पितामहाय ॐ नमो नारायण ॐ नमः शिवाय इति सकललोकैकजात्यमाने ब्रह्मविष्णुमहेश्वरे दण्डक-मण्डलुधारिणी शङ्खचक्रगदाधारिणी परशुशूलपिनाककण्टकधा-रिणी सरस्वती पद्मालये सावित्री सकलजगत्स्वरूपिणी महा-क्रूरे प्रसन्नरूपधारिणी सर्वमङ्गलप्रिये महासुरमर्दिनी कात्यायनी दुर्गा निद्रारूपिणी शरचापशूलकपालकरवालखड्गडमरुकाङ्कुशगदा-परशुतोमरभिन्दिपालभुशुंडीमुसलमुद्गरपरिघायुधदोर्दण्डी सहस्र-चन्द्रार्कवह्निनयनेन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरईशानप्रधान-शक्तिभूते सप्तद्वीपसमुद्रोपर्युपरिमहाभ्यासेश्वरी महासचराचर-प्रपञ्चतनूदरे महाप्रधाने महाकैलासपर्वतोद्याने वनक्षेत्रनदीतीर-देवताद्यायतनालङ्कृते मेदिनीनाथे वसिष्ठवामदेवादिमुनिगणस्पृ-ष्टचरणारविन्दे द्विचत्वारिंशद्वर्णमहितो पर्यास्थानेवेदवेदाङ्गानेक-शास्त्रभूते शब्दब्रह्ममये मातृकादेवी शिरस्सन् रक्ष रक्ष मम शत्रून् हुङ्कारेण नाशय नाशय भूतप्रेतपिशाचानुच्चाटयोच्चाटय वशीकुरु वशीकुरु क्षोभय क्षोभय संक्रामय विदारय विदारय दावय सकलचोरान्मूर्ध्नि स्फोटय स्फोटय सकलशत्रून् शीघ्रं मारय मारय हुं फट् स्वाहा ॥ १००० ॥

इति रुद्रयामलतन्त्रो सप्तशतीदलं सम्पूर्णम् ॥

श्रीदुर्गासप्तशतीहृदयम्

अथ सप्तशत्यङ्गहृदयारम्भः ।। अस्य श्रीचंडिकाहृदयमालामन्त्रस्य त्रिगुणात्मऋषिः विराट्छन्दः श्रीमहाचण्डी देवता ऐं बीजम् ह्रीं शक्तिः क्लीं कीलकम् जपे विनियोगः । हृदयादिषडङ्गन्यासः । ब्रह्मोवाच । अथातः संप्रवक्ष्यामि विस्तरेण यथायथम् । चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः । ॐ ह्रां ह्रीं हुं ऐं श्रीं श्रीं ॐ नमो भगवति जय जय ज्वालामालिनी चामुण्डे चण्डिके त्रिदशमणिमुकुटकोटिसद्घटितचरणारविन्दे गायत्रीसावित्रीसरस्वती-महाबाणकृताभरणे भैरवरूपधारिणी प्रकटसुदंष्ट्रोग्रवदने घोरघोराननेे नयनोज्ज्वलज्वालासहस्रपरिवृते महाट्टहासधवलीकृतदिगन्तरे दिवाकरसहस्रपरिवृते कामरूपधारिणी महामणिद्योतितशशिप्रभासितसकलदिगन्तरे सर्वायुधपरिपूर्णे कपालहस्ते गजाजिनोत्तरीण्ये भूतवेतालपरिवृते प्रकम्पितचराचरे मधुकैटभमहिषा–सुर–धूम्रलोचन–चण्डमुण्ड–रक्तबीज-निशुम्भ-शुम्भादिदैत्यनिष्कण्टकीकालरात्रि महामाये शिवे नित्ये त्रिभुवनधराधरे वामे ज्येष्ठे रौद्रि अम्बिके काली कलविकारिणी बलप्रमथिनी सर्वभूतदमनी मनोन्मयी ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंहीन्द्राणी चामुण्डे माहेन्द्री शिवदूती महाकाली-महालक्ष्मी-महासरस्वती-त्रिस्थिते नादवन्ध्यास्थिते महोग्रविषोरगफणाफणिमुकुटरत्नज्वालावले महाहारभूषितपादबाहुफणोत्तमाङ्गे मालाकुले नवरत्ननिधिकोशे शब्द-स्पर्श-रूप-रस-गन्धाकाशवाक्यानि पादपायूपस्थश्रोतत्वक्चक्षुजिह्वाघ्राणमध्यस्थिते चक्षुष्मती महाविषोपविघ्ने महाज्वालानले महाभैरवस्तुते सर्वसिद्धिप्रदे निर्मले निष्कले नाभ्याधरादिसंस्थिते परं ज्योतिःस्वरूपे

सोमसूर्याग्निमंडलपरिवृते ऊर्ध्वविशुद्धांतकप्रभे विनिकृतब्रह्मविष्णु-रुद्रविनिर्गते परे अपरे प्रभाभासितचरे पञ्चविंशतितत्त्वावबोधिनी महाशून्यागमे पतिबन्धुसंस्थिते अधोर्ध्वसंस्थिते भुक्तिमुक्तिफल-प्रदे निर्गुणे ऋग्यजुःसामाथर्वणपठिते एह्येहि भगवति स्थूल-सूक्ष्मपरहुंकारनिरूपिते परमकारुणिके महाज्वालामणिमहिषो-परि गन्धर्वविद्याधरश्रिते भुजङ्गमहिसे जम्भिणी मोहिनी क्षोभिणी वशीकरणी जम्भे मोहे क्षोभे वशीकरणे बीजपञ्चकमध्यस्थिते महायोगिनी महाज्वरक्षेत्रनायिके यक्षराक्षसमहाज्वरमहाविषोप-विघ्ने गन्धर्वविद्याधराराधिते ओङ्कारश्रीङ्कारहस्ते ॐ क्रों अग्नि-पात्रे द्रां शोषय शोषय प्लूं प्लावय प्लावय क्लीं श्रीं सुकुमारय सुकुमारय प्लुं सतैशय सतैशय सों उन्मादय उन्मादय ग्लौं मोहय हीं आं हीं आवेशय आवेशय श्रीं प्रवेशय प्रवेशय स्त्रीं कर्षय हुं हुं हुं फट् अतीतानागतवर्तमानन्दिशं विदिशं ऐं हीं श्रीं श्रावय श्रावय सर्वं प्रवेशय प्रवेशय त्रैलोक्यवशवर्ति ऐ-ङ्कारचित्तं वशीकुरुष्व एं हीं श्रीं स्त्रीं द्रावय द्रावय सर्वं प्रवेशय प्रवेशय ऐङ्कारचित्तं वशङ्कुरु ऐं हीं श्रीं हीं हीं हुं हैं हौं हः ऐं हीं श्रीं स्त्रां स्त्रीं स्त्रं स्त्रैं स्त्रौं स्त्रः मम सर्वकार्याणि साधय साधय हुं फट् स्वाहा ॥ १०९०-१८ ॥

एकविंशतिवारन्तु पठेदेवञ्जपेत्तु यः । राजद्वारे श्मशाने च विदेशे शत्रुमंडले ॥ १ ॥ भूताग्निरणमध्ये च सर्वकार्याणि साधयेत् । चण्डिका हृदयङ्गुह्यं त्रिसन्ध्यं कीर्तयेद् द्विजः ॥ २॥ सर्वकामप्रदं नृणां भुक्तिं मुक्तिञ्च विन्दति ॥ ३ ॥

इति रुद्रयामले दुर्गासप्तशतीहृदयं सम्पूर्णम् ।

दुर्गा देवी की आरती

जय अम्वे गौरी जय मंगलमूर्ती (मैया जय आनन्द करणी)।
तुमको निशिदिन ध्यावत हरि ब्रह्मा शिव री ।। १ ।।
माँग सिन्दूर विराजत टीको मृगमदको।
उज्वल से दोउ नैना चन्द्रवचन नीको ।। २ ।। जय अम्वे० ।।
कनक समान कलेवर रक्तांवर राजै।
रक्त पुष्प गलमाला कण्ठन पर साजै ।। ३ ।। जय अम्वे० ।।
केहरि वाहन राजत खड्ग खप्पर धारी।
सुर नर मुनि जन सेवत तिनके दुखहारी ।। ४ ।। जय अम्वे० ।।
कानन कुण्डल शोभित नासाग्रे मोती।
कोटिकचन्द्र दिवाकर राजत समज्योती ।। ५ ।। जय अम्वे० ।।
शुम्भ - निशुम्भ विदारे महिषासुरघाती।
धूम्र विलोचन नैना निशि दिन मदमाती ।। ६ ।। जय अम्वे० ।।
चण्डमुण्ड संहारे, शोणित बीज हरे।
मधु कैटभ दोउ मारे सुर भय हीन करे ।। ७ ।। जय अम्वे० ।।
ब्रह्माणी, रुद्राणी, तुम कमलारानी।
आगम-निगम-वखानी, तुम शिव-पटरानी ।। ८ ।। जय अम्वे० ।।
चौसठ योगिनि गावत नृत्य करत भैरुं।
बाजत ताल मृदंगा औ वाजत डमरू ।। ९ ।। जय अम्वे० ।।
तुम ही जगकी माता तुम ही हो भरता।
भक्तन की दुःख हरता सुख सम्पति करता ।।१०।। जय अम्वे० ।।
भुजा चार अति शोभित खड्ग खपर धारी।
मन वांछित फल पावत सेवत नर-नारी ।।११।। जय अम्वे० ।।
कञ्चन थाल विराजत अगर कपूर बाती।
श्रीमाल केतु में राजत कोटि रतन ज्योती ।।१२।। जय अम्वे० ।।
श्री अम्वेजी की आरती जो कोई नर गावै।
भक्त शिवानन्द स्वामी सुख सम्पति पावै ।।१३।।

भगवतीपुष्पाञ्जलिस्तोत्रम्—

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते गिरिवरविन्ध्य-शिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।। भगवति हे शितिकंठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १ ।। सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते ।। त्रिभुवनपोषिणि शंकरतोषिणि किल्बिषमोषिणि घोषरते ।। दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिंधुसुते जय जय हे० ।। २ ।। अयि जगदम्ब मदम्ब कदम्बवन-प्रियवासिनि हासरते ।। शिखरशिरोमणितुंगहिमालयशृङ्गनिजालयमध्यगते ।। मधुमधुरे मधुकैटभगंजिनि रासरते जय जय० ।। ३ ।। अयि शतखंडविखंडित-रुंडवितुंडितशुंडगजाधिपते ।। रिपुगजगंडविदारणचंडपराक्रमशुंडमृगाधिपते ।। निजभुजदण्डनिपातितखंडनिपातितमुंडभटाधिपते जय जय हे० ।। ४ ।। अयि रणदुर्म्मदशत्रुवधोदितदुर्धरनिर्जरशक्तिभृते चतुरविचारधुरीणमहाशिवधूतकृत-प्रथमाधिपते ।। दुरितदुरीहदुराशयदुर्मतिदानवदूतकृतांतमते जय जय० ।। ५ ।। अयि शरणागतवैरीवधूवरवीरवराभयदायकरे त्रिभुवनमस्तकशूलविरोधि-शिरोधिकृतामलशूलकरे । दुमिदुमितामरदुंदुभिमादमहोमुखरीकृततिग्मकरे जय जय हे० ।। ६ ।। अयि निजहुंकृतिमात्रनिराकृतधूम्रविलोचनधूम्रशते समरवि-शोषितशोणितवीजसमुद्भवशोणितवीजलते ।। शिव शिव शुम्भनिशुम्भमहाहव-तर्पितभूतपिशाचरते जय जय हे० ।। ७ ।। धनुरनुसंगरणक्षणसंगपरिस्फुरदंग-नटत्कटके कनकपिशंपृषत्कनिषंगरसद्भटशृङ्गहतावटुके ।। कृतचतुरंगबलक्षिति-रङ्गघटद्वहुरङ्गरटद्वटुके जय जय हे० ।। ८ ।। सुरललनाततथेयितथेयितथा-भिनयोत्तरनृत्यरते........................... ।। धिमिकटधिक्कटधिमिध्वनिधीर-मृदंगनिनादरते जय जय हे० ।। ९ ।। जय जय जप्यजये जयशब्दपरस्तुति-तत्परविश्वनुते झणझणझिंजिमिझिंकृतनूपुरसिंजितमोहितभूतपते ।। नटितनटार्ध-नटीनटनायकनाटितनाट्यसुगानरते जय जय० ।। १० ।। अयि सुमनःसुमनः-सुमनः सुमनः सुमनोहरकांतियुतेश्रितरजनीरजनीरजनीरजनीरजनीकरवक्त्रवृते ।।

सुनयनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराधिपते जय० ॥ ११ ॥ सहितमहाहव-
मल्लमतल्लिकमल्लितरल्लकमल्लरते विरचितवल्लिकपल्लिकमल्लिकझिल्लिक-
भिल्लिकवर्गवृते सितकृतफुल्लिसमुल्लसितारुणतल्लजपल्लवसल्ललिते जय०
॥१२॥ अविरलगंडगलन्मदमेदुरमत्तमतंगजराजपते त्रिभुवनभूषणभूतकलानिधि-
रूपपयोनिधिराजसुते ॥ अयि सुदतीजनलालसमानसमोहनमन्मथराजसुते जय
जय० ॥ १३ ॥ कमलदलामलकोमलकांतिकलाकलितामलभाललते ॥ सकल-
विलासकलानिलयक्रमकेलिचलत्कलहंसकुले ॥ अलिकुलसंकुलकुवलयमण्डल-
मौलिमिलद्बकुलालिकुले जय० ॥ १४ ॥ करमुरलीरववीजितकूजितलज्जित-
कोकिलमंजुमते मिलितपुलिंदमनोहरगुंजितरंजितशैलनिकुंजगते ॥ निजगुण-
भूतमहाशवरीगणसद्गुणसंभृतकेलितले जय० ॥ १५ ॥ कतितटपीतदुकूल-
विचित्रमयूखतिरस्कृतचंद्ररुचे प्रणतसुरासुरमौलिमणिस्फुरदंशुकसन्नखचंद्ररुचे ॥
जितकनकाचलमौलिपदोर्जितनिर्झरकुंजरकुंभकुचे जय० ॥१६॥ विजितसहस्रकरैक-
सहस्रकरैकसहस्रकरैकनते कृतसुरतारकसंगरतारकसंगरतारकसूनुसुते ॥ सुरथ-
समाधिसमानसमाधिसमानसमाधिसमाधिसमाधिसुजातरते जय जय० ॥ १७ ॥
पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे अयि कमले कमलानिलये
कलमानिलयः स कथं न भवेद् ॥ तव पदमेव परंपदमेमनुशीलयतो मम किं
न भवेत् ॥ तव पदमेव परंपदमेमनुशीलयतो मम किं न शिवे जय० ॥ १८ ॥
कनकलसत्कलसिंधुजलैरनुसिंचिनुते गुणरंगभुवं भजति स किं न शचीकुच-
कुंभतटीपरिरंभसुखानुभवम् ॥ तव चरणं शरणं करवाणि नतामरवाणिनिवासि
शिवे जय० ॥ १९ ॥ तव विमलेंदुकुलं वदनेन्दुमलं सकलं ननु कूलयते किमु
पुरुहूतपुरींदुमुखी सुमुखीभिरसौ विमुखीभिरसौ विमुखीक्रियते ॥ स तु मतं
शिवनामधने भवती कृपया किमुत क्रियते जय ॥ २० ॥ अयि मयि दीनदयालु-
तया कृपयैव त्वया भवितव्यमुमे अयि जगतो जननि कृपयासि यथासि तथा-
ऽनुमितासि रते ॥ यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते जय० ॥ २१ ॥

अथ नित्यचण्डीविधिः

साधक अपने पूजास्थान में बैठकर पहले शास्त्रोक्त विधि के अनुसार अपने नित्यकर्मों को करे। तदनन्तर अपने इष्ट देवों का स्मरण करते हुए निम्नलिखित विधि से संकल्प करे।

ॐ तत्सदद्यामुकमासि अमुकराशिगते सवितरि शुक्लपक्षे अमुकतिथौ विशेषक्षेत्रे अमुकक्षेत्रो अमुकगोत्रोऽमुकशर्माहममुकफलावाप्तये अद्यारभ्य मासमात्रं नित्यचण्डीजपं करिष्ये।

यदि साधक स्वयं पूजा करने में असमर्थ हों तो किसी सच्चरित्र ब्राह्मण के द्वारा पाठ करावे सिर्फ संकल्प में 'अहं करिष्ये' के स्थान पर 'अहं करिष्यामि' ऐसा आचार्य को पढ़ना चाहिये।

इसके बाद दशदिक्पाल एवं नवग्रहों की पूजा करके तीनों रहस्यों के साथ तीनों चरित्रों का प्रत्येक दिन एक पाठ करे। निम्नलिखित मंत्रों के द्वारा क्रमशः प्रत्येक चरित के प्रारम्भ में विनियोग करके मूलमंत्र से न्यास करे।

इस मंत्र से प्रथम चरित के पाठ के प्रारम्भ में विनियोग करे।

"देवीमाहात्म्यस्यादिचरितस्य ब्रह्मा ऋषिर्गायत्रीछन्दः श्रीमहाकाली देवता दक्तदन्तिका बीजं नन्दा शक्तिरग्निस्तत्वं प्रथमचरितजपे विनियोगः"।

इस मंत्र के द्वारा द्वितीय चरित के प्रारम्भ में विनियोग—

"मध्यम चरितस्य विष्णुऋषिरूष्णिक्च्छन्दः श्री महालक्ष्मीर्देवता दुर्गाबीजं शाकम्भरी शक्तिर्वायुस्तत्वं मध्यमचरितजपे-विनियोगः"।

उत्तर चरित के प्रारम्भ में विनियोग—

"उत्तरचरितस्य रुद्र ऋषिरनुष्टुप्छन्दः श्रीमहासरस्वती देवता भ्रामरी बीजं भीमा शक्तिः सूर्यस्तत्त्वमुत्तरचरितजपे विनियोगः"।

एक महीना पूरा हो जाने पर अन्तिम दिन पूजा स्थान में मण्डप बनाकर उसे सुसज्जित करके कुण्ड का निर्माण करना चाहिये। तब अग्नि की स्थापना

करके पायस, घृत एवं तिल से जपे हुए मूल मंत्रों के दशांश मंत्रों से हवन, उसके दशांश से तर्पण तथा उसके दशांश से मार्जन करना चाहिए। हवन के बाद ब्राह्मण भोजन कुमारी भोजन तथा बन्धु बान्धवों को भोजन करवा कर अपनी पूजा की समाप्ति करे। यदि अन्य ब्राह्मण के द्वारा पूजा करवाई गयी हो तो उसे अपनी शक्ति के अनुसार समुचित दक्षिणा देकर उनसे आशीर्वाद ग्रहण करें। यह विधान निम्नलिखित खिलमार्कण्डेयोक्त के अनुसार विहित है।

अथ नित्यचण्डीविधिः

ऋषिरुवाच—

नित्यचण्ड्यादिजापस्य विधानं ते वदाम्यहम्।
क्रमेण सर्वकार्याणां सिद्धये सर्वपुण्यदम्॥ १॥
पूर्वोक्तविधिना कृत्वा चण्डिकातर्पणादिकम्।
शुक्लभूतमवष्टभ्य मासं प्रतिदिनं जपेत्॥ २॥
सकृद्रहस्यसंयुक्तं चण्डिका-चरितत्रयम्।
दशांशहोमसहितं सोच्यते नित्यचण्डिका॥ ३॥
धनपुत्रयशोदात्री महाव्याधिविनाशिनी।
महाभयमहादुःखहन्त्री सौख्यप्रदायिनी॥ ४॥

इति खिलमार्कण्डेये श्रीनित्यचण्डीविधिः।

अथ नवचण्डीविधिः

नवचण्डी पाठ प्रारम्भ करने के पहले साधक को अपने पूजा स्थान को ध्वजा-वितान आम्रपल्लव आदि अलङ्कारों से सुसज्जित कर लेना चाहिए। तदुपरान्त अपने सन्ध्योपासनादि नित्यकर्मों से निवृत होकर निम्नलिखित अनुसार संकल्प करे।

"ॐ तत्सदद्यामुकमासि अमुकराशिगते सवितरि शुक्लपक्षे प्रतिपदि तिथौ विशेषक्षेत्रे (काश्यादिक्षेत्रे) अमुकगोत्रोऽमुकशर्माऽहममुकफलवाप्तये अद्यारभ्य नवमीं तिथिं यावत् नवचण्डीविधानमहंकरिष्ये"।

साधक यदि स्वयं इस कार्य को करने में असमर्थ हो तो किसी अन्य सच्चरित्र ब्राह्मण को आचार्य बनाकर उसके द्वारा करवाना चाहिए। किन्तु संकल्प में 'अहं करिष्ये' के स्थान पर 'अहं करिष्यामि' ऐसा पढ़ना चाहिए।

संकल्प के बाद पूर्व दिशा में गजवाहना कादम्बरी का ध्यान करके 'ॐ कादम्बरि इहागच्छ' इस मंत्र से आवाहन करना चाहिए। तब गन्ध, पुष्प, धूप, दीप आदि से विधिवत् पूजन करके घृत, शक्कर और अनेक प्रकार के व्यञ्जनों से युक्त पायस (हविंष्यान्न) को 'ॐ श्री कादम्बरी एष ते बलिर्नमः' इस मंत्र से अर्पण करके क्षमा-याचना सहित प्रणाम करना चाहिये।

इसके बाद अग्निकोण में उल्का गजवाहना देवी, दक्षिण दिशा में 'महिषारूढा कराली', नैऋत्यकोण में, प्रेतवाहना रक्ताक्षी' पश्चिम में मकरवाहना श्वेता', वायुकोण में 'मृगवाहना हरिता' उत्तर में 'सिंहवाहना यक्षिणी', ईशान कोण में 'वृषवाहना कंकाली,' पूरब और ईशान कोण के बीच में 'हंसवाहना सुरज्येष्ठा' तथा नैऋत्य और दक्षिण दिशा के बीच में 'अतिवाहना सर्पराज्ञी' देवी का अलग-अलग अपने-अपने स्थान में पूजन करके बलि का अर्पण करना चाहिये।

इसके बाद सूर्यादि पञ्च देवता, नवग्रह, गणेश, दुर्गा, वायु, आकाश तथा दोनों अश्विनी कुमारों का क्रमशः पूजन करके उन-उन दिशाओं में इन्द्रादि दश दिक्पालों की पूजा करनी चाहिए। तब मण्डप के बीच में 'आजिघ्रकलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारापयस्वती पुनर्माविशताद्रयिः। इस मन्त्र से कलश की स्थापना करके द्वारपूजा के स्थान पर उस कलश में महालक्ष्मी का आवाहन करना चाहिए। एवं फूल, अक्षत, चन्दन आदि से विधिवत् पूजन करके उसके सामने ही तीनों रहस्यों के साथ चरित्रत्रयरूप देवी माहात्म्य का पाठ शान्त चित्त से करना चाहिए। पाठ की समाप्ति के बाद एक कुमारी तथा एक सुयोग्य ब्राह्मण को विधिपूर्वक भोजन कराके ताम्बूल, दक्षिणा आदि के द्वारा सन्तुष्ट करके प्रणाम करना चाहिए।

इसी क्रम से द्वितीया को दोगुना और तृतीया को तिगुना एवं नवमी पर्यन्त नौगुणा चण्डीपाठ, कुमारी और ब्राह्मण भोजन कराना चाहिए। चण्डीपाठ करनेवाले साधक को प्रतिदिन एक ही प्रकार का आहार लेना चाहिए। पाठ के अन्तिम दिन संपूर्ण किये हुए चण्डीपाठों के दशांश तिल, घृत तथा पायस (हविष्यान्न) से विधिपूर्वक हवन करके अपने कार्य को समाप्त करना चाहिए। यदि अन्य आचार्य के द्वारा पाठ संपन्न करवाना हो तो उसे अपनी शक्ति के अनुसार उदारता से दक्षिणा आदि देकर सन्तुष्ट करना चाहिए।

इस प्रकार विधिवत् जो नवचण्डी का पाठ करता है उसे सभी कामनाएं पूरी हो जाती हैं। पुत्रहीन को पुत्र तथा धनहीन को धन मिलता है। उनकी सारी व्याधियाँ, प्रबल शत्रु, राजा, चोर, अग्नि और जल का भय समाप्त हो जाते हैं। यह विधान निम्नलिखित खिलमार्कण्डेयोक्त के अनुसार विहित है।

अथ नवचण्डीविधिः

ऋषिरुवाच—

शरदृताविषे मासि शुक्लपक्षे नृपोत्तम ।
प्रतिपत्तिथिमारभ्य नवचण्डीं समापयेत् ॥ १ ॥

तोरणाढ्ये शुभे स्थाने सुवितानाद्यलङ्कृते ।
पूर्वादिक्रमयोगेन दिग्देवीभ्यो बलिं हरेत् ॥ २ ॥

गन्धपुष्पाक्षतैर्धूपैर्दीपैश्चरुभिरुत्तमैः ।
कादम्बरी गजारूढा पुनरुल्काजपृष्ठगा ॥ ३ ॥

कराली महिषारूढा रक्ताक्षी प्रेतसंस्थिता ।
श्वेतकुम्भीरगा श्वेता हरिता मृगवाहना ॥ ४ ॥

यक्षिणी सिंहपृष्ठस्था कङ्काली वृषवाहना ।
हंसपृष्ठे सुरज्येष्ठा सर्पराज्ञहिवाहना ॥ ५ ॥

अनेन विधिना दत्त्वा दिग्देवीभ्यो बलिं जपी ।
नवग्रहाँल्लोकपालान्दिशापालांश्च पूजयेत् ॥ ६ ॥

विनायकस्तथा दुर्गा वायुराकाशमेव च ।
अश्विनौ च महात्मानौ लोकपालाः प्रकीर्तिताः ॥ ७ ॥

कलशं पञ्चरत्नाढ्यं हेमवस्त्रादिकान्वितम् ।
संप्रतिष्ठाप्य सम्पूज्य चण्डिकार्चनमाचरेत् ॥ ८ ॥

पूर्वोक्तेन विधानेन गन्धपुष्पैरनुत्तमैः ।
वस्त्रालङ्कारकस्तूरी-सिन्दूरागरुकुङ्कुमैः ॥ ९ ॥

धूपैर्बहुविधैर्दीपैर्नैवेद्यैर्वर्णसंख्यया ।
कृत्वान्यत् पूर्ववत्सर्वं जपेदेकाग्रमानसः ॥१०॥
सकृद्रहस्यसंयुक्तं चण्डिका-चरितत्रयम् ।
कुमारी विप्रमुख्यांश्च भोजयेद् विधिपूर्वकम् ॥११॥
यद्वाद्यद्दिवसे कुर्याच्चचण्डिकापूजनादिकम् ।
द्विगुणं तद्द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥१२॥
नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।
एकाहारव्रती कुर्यात्सत्यादिनियमैर्युतः ॥१३॥
कृत्वा होमादिकं सर्वं नवदुर्गाविधानवत् ।
वित्तशाठ्यं परित्यज्य कुर्यादाचार्यतोषणम् ॥१४॥
वस्त्राङ्गुलीयभूधेनुवाजिहेम-प्रदानतः ।
अशक्तो निष्कमेकं तु देयमस्मै प्रयत्नतः ॥१५॥
विदधीत विधानेन य एनां नवचण्डिकाम् ।
शृणुष्वास्य फलं भूप यो हि कश्चिदनेन वै ॥१६॥
ऐन्द्रब्राह्मादयो भोगास्तमायान्ति प्रसेवितुम् ।
अपुत्रो लभते पुत्रानधनः सधनो भवेत् ॥१७॥
व्याधयः संक्षयं यान्ति शत्रवश्च सुदारुणाः ।
न तस्यास्ति भयं किञ्चिद्राजचोराग्निवारिजम् ॥१८॥

इति श्रीखिलमार्कण्डेयं नवचण्डीविधिः समाप्तः ।

—:०:—

अथ नवदुर्गाविधिः

नये वस्त्र को धारण करके साधक अपने नित्यकर्मों को समाप्त करके पूरब मुख होकर बैठे और तिथि आदि का उल्लेख करते हुए पूर्वोक्त विधि से संकल्प करे। इस विधान में शुक्लपक्ष की अष्टमी तिथि को चण्डी का पाठ प्रारम्भ होता है तथा कृष्ण पक्ष की प्रतिपत् तिथि को समाप्त हो जाता है। अर्थात् नौ दिन में यह विधान समाप्त हो जाता है। प्रत्येक दिन सिर्फ एक पाठ ही किया जाता है। साधक प्रथम दिन पञ्च देवता आदि की पूजा करके देवी की स्थापना किसी पीठ पर करके विधिवत् पूजन करे। तब देवी के आगे शालिपुञ्ज (धान्यराशि) पर कलश की स्थापना "आजिघ्नकलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरु धारापयस्वती पुनर्माविशताद्रयिः" इस मंत्र से करे।

इसके बाद "इमं मे वरुण श्रुधि हवमद्या च मृडयत्वामवस्युराचक्रे" तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानोवरुणे ह बोध्युरुश ꣳ समान आयुः प्रमोषीः।" इस मंत्र से कलश में शुद्ध जल भरकर उसमें आम्रपल्लव देकर उसके ऊपर सुँपारी, चावल रखकर उसी कलश के समान धातुवाला एक पात्र रखना चाहिए। कलश को लाल वस्त्र से वेष्ठित करना चाहिए। तब प्रत्येक दिशाओं में पूर्वादि क्रम से इन्द्रादि दशदिक्पालों की पूजा करके साधक मूल मन्त्र से न्यास करे। तदनन्तर तीनों रहस्यों के साथ तीनों चरित्रों का प्रत्येक दिन एक आवृत्ति पाठ करे। इस प्रकार नौ दिन तक पाठ करके दशवें दिन अग्नि की स्थापना करके मूल मन्त्र से १०८ बार हवन करे तथा ब्राह्मण, कुमारी आदि को भोजन करावे एवं दक्षिणा आदि देकर प्रणाम करे। स्वयं अशक्त होने से किसी अन्य आचार्य द्वारा यह कार्य सम्पन्न करवावे। नवदुर्गा-विधान दो प्रकार का होता है। कालरात्रि तथा नवदुर्गा। कृष्ण पक्ष की अष्टमी तिथि से प्रारम्भ होकर शुक्ल प्रतिपत् तिथि तक किए जाने वाले पाठ को कालरात्रि विधान तथा शुक्ल पक्ष की अष्टमी तिथि से प्रारम्भ होकर कृष्णपक्ष की प्रतिपत् तिथि तक किये गए पाठ विधान को नवदुर्गा विधान कहते हैं। यह विधान निम्नलिखित खिलमार्कण्डेयोक्त के अनुसार विहित है।

अथ नवदुर्गाविधिः

ऋषिरुवाच

शुक्लाष्टमीमथारभ्य यावत्कृष्णा च नन्दिनी ।
नवदुर्गा विधातव्या सर्वाभीष्टफलार्थिना ॥ १ ॥
संपूज्य विधिवद्देवीं चण्डिकां कृततर्पणाम् ।
कलशं पञ्चरत्नाढ्यं सहकारहलान्वितम् ॥ २ ॥
सवक्त्रं संप्रतिष्ठाप्य चण्डिकाग्रेऽम्भसा भृतम् ।
समन्तात्पूजयेद्दिक्षु दिशापालान्यथाक्रमम् ॥ ३ ॥
चन्दनेन विलिप्ताङ्गः स्रग्वी न्यासपरायणः ।
नवाहं भूप एकैकं मौनी बद्धासनो जपेत् ॥ ४ ॥
प्रणवादिरहस्यान्तं चण्डिका-चरितत्रयम् ।
नवदुर्गेति विख्याता पापतापप्रणाशिनि ॥ ५ ॥
सर्वैश्वर्यप्रदा भूप कुर्वतामविलम्बितम् ।

इति श्रीखिलमार्कण्डेये शतचण्डीविधिः समाप्तः ।

--:०:--

अथ शतचण्डीविधिः

मार्कण्डेय ऋषि शतचण्डी विधान विधि पूर्वक कहते हैं । देश में भयङ्कर आकाल पड़ने से, अतिवृष्टि तथा अनावृष्टि होने से, भूकम्प आदि का भय आने पर, क्षयरोग हो जाने से, भयङ्कर ग्रह आने से, पुत्र न होने से तथा अन्य भी इसी तरह के संकट आने पर शतचण्डी महायज्ञ किया जाता है । यह महायज्ञ शिवालय या अन्य किसी मन्दिर के पास किया जाता है । यदि

घर के पास मन्दिर न हो तो अपने घर के ईशानकोण में मण्डप का निर्माण करना चाहिए। शास्त्रीय विचार के अनुसार उजली, लाल अथवा पीली मिट्टी वाली भूमि पर यज्ञादि शुभ कार्यों का शास्त्रकारों ने निरोध किया है। मण्डप १६ या १४ या १२ हाथ का चतुर्भुज होना चाहिए। १२ हाथ का अधम १४ हाथ का मध्यम तथा १६ हाथ का मण्डप उत्तम माना गया है। मण्डप के बीच में एक हाथ ऊँची तथा उतनी ही लम्बी चौड़ी चौकोर वेदी का निर्माण करना चाहिए।

शतचण्डी महायज्ञ में एक आचार्य तथा नौ ब्राह्मण होना चाहिये। ये सभी सदाचारी, कुलीन श्रीमान्, सत्यवादी तथा दयालु हों तभी इनसे पाठ करवाना चाहिए। सपत्नीक यजमान सुन्दर आसन पर वैठकर "ओमद्येत्यादिशतचण्डीमखयथाविहितकर्मसम्पादनार्थम् आचार्यत्वेन त्वामहं वृणे" इस मंत्र से आचार्य को तथा "ओमद्येत्यादिशतचण्डीमखयथाविहितकर्मसम्पादनार्थं ब्राह्मणामृत्विजाँ वरणमहं करिष्ये" इस मंत्र से ब्राह्मणों को वरण देना चाहिए। इसके वाद ब्राह्मणों द्वारा उच्चारित स्वस्तिवाचक मन्त्रों का श्रवण करते हुए सपत्नीक यजमान अपने वन्धुवान्धवों के साथ मण्डप के समीप जाकर द्वारपूजा करके पश्चिम द्वार से मण्डप में प्रवेश करे और हाथ जोर कर आचार्य को चण्डिका पूजन के लिए आज्ञा दे। आचार्य आचमन प्राणायाम आदि करके "ओमद्य अमुकमासिअमुकपक्षे अमुकतिथौ अमुकवासरे अस्य यजमानस्य सकुटुम्बस्य मनोवाञ्छितफलसिद्ध्यर्थमाधिव्याधिमहामृत्युभयशोकनिवृत्यर्थं भूतवर्तमानभविष्यत्रिविधोत्पातशान्त्यर्थं परमैश्वर्यसम्पत्तिप्राप्त्यर्थं शतचण्डीकर्मसम्पादनमहं करिष्यामि" इस मंत्र से संकल्प करे। तत्पश्चात् नवचण्डी विधान की भाँति देवी पूजा, बलि का अर्पण करके मण्डप पर किसी पीठ पर ग्रहमण्डल का निर्माण करके दशदिक्पालों की पूजा करनी चाहिए। एवं पूर्व की भाँति प्रधान कलश की स्थापना करके मण्डप के बाहर पूर्वादि क्रम से चारों दिशाओं में भूतादि को बलि देकर मण्डप के प्रत्येक द्वार पर दो-दो जल पूर्ण कलशों की स्थापना करनी चाहिए। तबा आचार्य पद्मासन लगाकर आसन की पूजा करने के बाद अपने आसन पर बैठकर

चण्डिका का ध्यान कर भूतशुद्ध्यादि करना चाहिए। तत्पश्चात् मूल मन्त्र से तीन बार प्रणाम करके ऋष्यादिन्यास, करादिन्यास, षडङ्गन्यास तथा व्यापकन्यासादि मूल मंत्र से ही करना चाहिए। तब प्रधानकलश में पीठ पूजा के साथ चण्डिका का सचक्र सांग सावरण ध्यान करना चाहिए। पूजन सामग्री के लिए अस्सी गुञ्जा कस्तूरी, उतना ही कुमकुम, जायफल, उतना ही कपूर को एक पल (बीस से तीन गुञ्जा) चन्दन में घीस कर दो पल चन्दन तैयार करना चाहिए। इसके अतिरिक्त पचीस हजार पुष्प, दो पल गुग्गुल, घृतपूर्ण बीस दीप, नैवेद्य के लिए दो कुटुम्ब (बीस तोला) हविष्यान्न, पहनने योग्य उत्तम साड़ी, तीन गद्यानक (आधा तोला) सुवर्ण से निर्मित आभूषण की आवश्यकता होती है। इन सामानों को जुटाकर नौ ब्राह्मणों से साङ्ग सावरण महालक्ष्मी की पूजा करवाकर सप्तशती पाठ के लिए आज्ञा दें। जब तक देवी का पूजन हो तब तक सभी ब्राह्मण 'जय चण्डि' इसे उच्चारण करते हुए देवी का ध्यान करना चाहिए। पश्चात् आचार्य सहित सभी ब्राह्मण वेदी के पास अपने-अपने आसन पर बैठकर प्रसन्न चित्त होकर मूलमन्त्र से न्यास करके तीनों रहस्यों सहित चण्डी का पाठ करें। पुनः उठकर महालक्ष्मी की प्रदक्षिणा करके आसनों पर बैठकर यजमान की मनोकामना की पूर्ति के लिए देवी से प्रार्थना करें।

पश्चात् यजमान धूप, दीप, पुष्प आदि से कुमारियों तथा दश ब्राह्मणों की पूजा करके भोजन करावें और ताम्बूल दक्षिणा आदि को देकर उन्हें सन्तुष्ट करे। तब आचार्य और नौ ब्राह्मणों को भी भोजन करावे। रात में बन्धु-बान्धवों के साथ भजन-कीर्तन करते हुए जागरण करें। इस प्रकार प्रथम दिन का विधान समाप्त करके दूसरे दिन भी उसी क्रम सब काम सम्पन्न करें। किन्तु पूर्व दिन की अपेक्षा दूसरे दिन दो गुने, तीसरे दिन तीन गुने, चौथे दिन चार गुने जप एवं पाठ होना चाहिए। इसी प्रकार कुमारी भोजन, ब्राह्मण भोजन, दक्षिणा आदि दूसरे दिन दो गुने, तीसरे दिन तीन गुने तथा चौथे दिन चार गुने करना चाहिए। तत्पश्चात् पाँचवें दिन अग्नि की स्थापना करके पायस, घृत, एवं तिल से हवन करना चाहिए। हवन जप के दशांश

संख्या के द्वारा तीनों रहस्यों के साथ तीनों चरित्रों के प्रत्येक मन्त्र से अथवा 'नमो देव्यै महादेव्यै' इस मन्त्र से अथवा नवार्ण मन्त्र से हवन करना चाहिए। पुनः दिग्देवियों के तत्तत् मन्त्रों से सौ सौ बार हवन करना चाहिए। इस हवन की समाप्ति के बाद यजमान देवी को प्रणाम करें।

इसके बाद दोनों स्तम्भों पर श्रुव को रखकर घृतकुम्भ से दशांशघृत को लेकर 'मूर्धानं दिवो अरतिं पृथिवा वैश्वानरमृत आजातमग्निम्। कवि ᳪ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः॥ इस मन्त्र से अवच्छिन्न धारा से पूर्णाहुति करनी चाहिए। यजमान ब्राह्मणों को अपनी शक्ति के अनुसार दक्षिणा, सुवर्णमयी गौ आदि का दान देना चाहिए। इसके बाद आचार्य स्वस्तिवाचन मन्त्रों के द्वारा ऋत्विज, कुंकुम, दुर्वाक्षत, चन्दन तथा दधि लेकर यजमान को आशीर्वाद दे। इस प्रकार सपत्नीक यजमान ब्राह्मणों को अधिक से अधिक दान दक्षिणा देकर बन्धु-बान्धवों के साथ भजन कीर्तन करते हुए अपने घर को प्रस्थान करे। यह विधान निम्नलिखित खिल-मार्कण्डेयोक्त के अनुसार विहित है।

अथ शतचण्डीविधिः

शतचण्डीविधानं ते यथावत् कथयाम्यहम्।
सुघोरायामनावृष्ट्यां भूकम्पे च सुदारुणे॥ १॥
परचक्रभये तीव्रे क्षयरोग उपस्थिते।
राज्यावाप्त्यादिकार्येषु स्वायुष्यसुतजन्मनि॥ २॥
महोपघातनाशाय पञ्चविंशतियोजने।
देशे सर्वत्र शान्त्यर्थं शतचण्डीमखं चरेत्॥ ३॥
शिवाभ्यासे समे देशे चतुर्द्वारं सतोरणम्।
पताकासंस्कृतं कुर्यान्मण्डपं वेदिभूषितम्॥ ४॥
तत्र कुण्डं प्रकर्त्तव्यमुक्तलक्षणसंयुतम्।
सदाचाराःकुलीना ये श्रीमन्तःसत्यवादिनः॥ ५॥

3654

चण्डीपाठसंपूर्णा दयावन्तो जितेन्द्रियाः ।
ईदृग्लक्षणसंयुक्ता दम्भमोहविवर्जिताः ॥ ६ ॥
दश विप्राः समभ्यर्च्या महालक्ष्मीस्वरूपिणः ।
मधुपर्कविधानेन यथावत्तद् वदाम्यहम् ॥ ७ ॥
श्रीपर्णीवृक्षपीठानि हस्तमानानि मानतः ।
अष्टाङ्गुलसमुच्छ्रायसहितानि समानि च ॥ ८ ॥
स्रुवः स्रुचा सखायुक्तः खादिरो लक्षणान्वितः ।
सप्तविंशतिदर्भाणां वेण्यग्रग्रन्थिभूषिता ॥ ९ ॥
विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितम् ।
शुद्धोष्णोदकसंपूर्णाः पाद्यार्थे ताम्रगण्डुकाः ॥१०॥
शङ्खा अर्घ्यप्रदानाय गन्धपुष्पजलान्विताः ।
पूर्वोदकसमायुक्ताः स्थापनीयाः पृथक् पृथक् ॥११॥
सुताम्रस्य कमण्डलव आचमनोदकपूरिताः ।
सम्पुटा मधुपर्कार्थाः कांस्या दध्यादिपूरिताः ॥१२॥
महान्त्यर्घाणि वस्त्राणि मुद्रिकाद्यं सुभूषणम् ।
मयूरपत्रच्छत्राणि सोष्णीषाणि समाहरेत् ॥१३॥
पादुकाश्चाहरेत्तत्र ताम्रभूषणभूषिताः ।
अन्यत्सर्वं यदस्त्युक्तं मधुपर्कस्य पूजने । १४॥
शतचण्डीमखे कर्त्ता प्रयत्नेन समाहरेत् ।
स्मार्तोक्तविधिना सम्यङ्मधुपर्कस्य पूजनम् ॥१५॥
कृत्वा फलमवाप्नोति महायज्ञार्णवोपमम् ।
अन्येभ्यो मधुपर्कस्य विप्रेभ्यः पूजनं समम् ॥१६॥

विद्यात्तद्द्विगुणं दद्यादाचार्याय सुभक्तिमान् ।
अन्यैर्द्विजैः समं यत्र भवेद्देशिकपूजनम् ॥१७॥
तस्मिन् यज्ञे फलं स्वल्पमनावृष्टौ यथा क्षितौ ।
अर्चितास्ते द्विजश्रेष्ठाः संतुष्टाः पूर्णमानसाः ॥१८॥
यजमानं सपत्नीकं सुतबन्धुसमन्वितम् ।
उपवेश्यासने कुण्डकलशाग्रविभूषितम् ॥१९॥
वेदमन्त्राक्षतैः पूर्णं कुर्वन्ति स्वस्तिवाचनम् ।
कृतस्वस्त्ययनैर्विप्रैर्वेदवादित्रनिस्वनैः ॥२०॥
चण्डिकामण्डपं यायात् परिवारभूषितः ।
पश्चिमद्वारमार्गेण प्रविश्य क्रतुमण्डपम् ॥२१॥
ददाति पूजनेऽनुज्ञां देशिकाय कृताञ्जलिः ।
देशिकः सर्वमन्त्रज्ञो नवभिर्ब्राह्मणैः सह ॥२२॥
दिग्देवता ग्रहांश्चैव लोकपालसमन्वितान् ।
दिशापालांश्च संपूज्य कलशं स्थाप्य पूज्य च ॥२३॥
मण्डपस्य चतुर्दिक्षु दत्त्वा भूतबलिं बहिः ।
मण्डपे कलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत् ॥२४॥
गलितोदकसम्पूर्णावाम्रपल्लवशोभितौ ।
उपस्पृश्योदकं ध्यात्वा चण्डिकां देववन्दिताम् ॥२५॥
उपवेश्यासने वेद्यां बद्ध्वा पद्मासनं दृढम् ।
प्राणायामविशुद्धात्मा दशक-न्यासभूषितः ॥२६॥
चण्डिकापूजनं कुर्याद्विशेषेण समन्वितम् ।
कस्तूरी कुंकुमं जात्यं सकर्पूरं च चन्दनम् ॥२७॥

पलद्वयं तु संपूर्णमनुलेपनमाहरेत् ।
दिव्यवस्त्रमलङ्कारं हेमगद्याणकत्रयम् ॥२८॥
लक्षपुष्पचतुर्थांशं गुग्गुलस्य पलत्रयम् ।
दीपानां विंशतिः श्रेष्ठं मण्डपे जपसाधनम् ॥२९॥
कुडवौ द्वौ हविष्यान्नं नैवेद्यं सरसं शुचि ।
ताम्बूलानां सकर्पूरं शतद्वयमनुत्तमम् ॥३०॥
नवचण्डीविधानोक्तं महालक्ष्म्याः प्रपूजनम् ।
नवभिर्ब्राह्मणैः सार्धं कृत्वाचार्यो द्विजोत्तमः ॥३१॥
ददाति नव विप्रेभ्य आचार्यश्चण्डिकामयः ।
कार्यं जाप्यप्रसिद्ध्यर्थमतुलं मानपूर्वकम् ॥३२॥
ततोऽनुज्ञामनुप्राप्य वेद्यमाचार्यसंनिधौ ।
सुखासने सुसंतुष्टा उपविष्टाः सुनिश्चलाः ॥३३॥
न्यासध्यानसमायुक्ता नासाग्रमवलोकिनः ।
सुगन्धपुष्पमालाढ्याश्चण्डिकाचरितत्रयम् ॥३४॥
सरहस्यमृषिश्छन्दो देवताशक्तिसंयुतम् ।
बीजतत्त्वसमायुक्तमुपांशुगुणसंयुतम् ॥३५॥
जपेयू रूपमेकैकं मौनिनस्त्यक्तमत्सराः ।
समुत्थाय ततः कुर्युः सर्वे देव्याः प्रदक्षिणम् ॥३६॥
चण्डिकां तु नमस्कारैः परितोष्य पुनः पुनः ।
उपविश्यासनेषूक्तश्लोकैः सर्वार्थसाधकैः ॥३७॥
प्रार्थयेयुः प्रार्थ्यफलं महालक्ष्मीं दृढव्रताः ।
कुमार्यो दश संभोज्या विप्रा भोज्या दशोत्तमाः ॥३८॥

महाकाल्याश्च लक्ष्म्याश्च सरस्वत्या जपं जपन् ।
भोजयेत्परया भक्त्या देशिकादिदशद्विजान् ॥३९॥
ततो भक्तिसमायुक्तो भुञ्जीयाद्यज्ञकृत् पुमान् ।
सत्कथाभिः सुगीतैश्च सर्ववादित्रनिःस्वनैः ॥४०॥
पूजनैः प्रोक्षणीयैश्च वेदपाठैर्निशां नयेत् ।
द्वितीये दिवसे स्नात्वा विधिवत्ते द्विजा दश ॥४१॥
चण्डिकातर्पणं कुर्युः सम्पूर्णं ध्यानतत्पराः ।
सर्वं पृथक् पृथक् कृत्वा दिग्देवीपूजनादिकम् ॥४२॥
बहिर्भूतबलिं दत्त्वा कृत्वा देवी-प्रदक्षिणम् ।
पुण्यागारे महारम्ये स्वे स्वे च स्वासने स्थिताः ॥४३॥
जपन्ति जय चण्डीति यावद् दुर्गाप्रपूजनम् ।
पूर्वस्मात् पूजनात् कुर्याद् द्विगुणं पूजनं क्रमात् ॥४४॥
